# ।। श्री अन्नपूर्णाष्टोत्तरशतनामस्तोत्र ।।

## ।।विनियोग:।।

श्री अन्नपूर्णाष्टोत्तरशतनामस्तोत्रमन्त्रस्य भगवान् श्रीब्रह्मा ऋषिः । अनुष्टुप्छन्दः । श्रीअन्नपूर्णेश्वरी देवता । स्वधा बीजम् । स्वाहा शक्तिः । ॐ कीलकम् । भगवती अन्नपूर्णा प्रसन्नार्थे धन धान्य समृध्दि प्राप्तयर्थे पाठे विनियोगः ।

## ।। अथ स्तोत्रम।।

**ॐ अन्नपूर्णा शिवा देवी भीमा पुष्टिस्सरस्वती ।**

**सर्वज्ञा पार्वती दुर्गा शर्वाणी शिववल्लभा ॥ १॥**

**वेदवेद्या महाविद्या विद्यादात्री विशारदा ।**

**कुमारी त्रिपुरा बाला लक्ष्मीश्श्रीर्भयहारिणी ॥ २॥**

**भवानी विष्णुजननी ब्रह्मादिजननी तथा ।**

**गणेशजननी शक्तिः कुमारजननी शुभा ॥ ३॥**

**भोगप्रदा भगवती भक्ताभीष्टप्रदायिनी ।**

**भवरोगहरा भव्या शुभ्रा परममङ्गला ॥ ४॥**

**भवान्नी चञ्चला गौरी चारुचन्द्रकलाधरा ।**

**विशालाक्षी विश्वमाता विश्ववन्द्या विलासिनी ॥ ५॥**

**आर्या कल्याणनिलया रुद्राणी कमलासना ।**

**शुभप्रदा शुभावर्ता वृत्तपीनपयोधरा ॥ ६॥**

**अम्बा संहारमथनी मृडानी सर्वमङ्गला ।**

**विष्णुसंसेविता सिद्धा ब्रह्माणी सुरसेविता ॥ ७॥**

**परमानन्ददा शान्तिः परमानन्दरूपिणी ।**

**परमानन्दजननी परानन्दप्रदायिनी ॥ ८॥**

परोपकारनिरता परमा भक्तवत्सला ।

पूर्णचन्द्राभवदना पूर्णचन्द्रनिभांशुका ॥ ९॥

शुभलक्षणसम्पन्ना शुभानन्दगुणार्णवा ।

शुभसौभाग्यनिलया शुभदा च रतिप्रिया ॥ १०॥

चण्डिका चण्डमथनी चण्डदर्पनिवारिणी ।

मार्ताण्डनयना साध्वी चन्द्राग्निनयना सती ॥ ११॥

पुण्डरीकहरा पूर्णा पुण्यदा पुण्यरूपिणी ।

मायातीता श्रेष्ठमाया श्रेष्ठधर्मात्मवन्दिता ॥ १२॥

असृष्टिस्सङ्गरहिता सृष्टिहेतुः कपर्दिनी ।

वृषारूढा शूलहस्ता स्थितिसंहारकारिणी ॥ १३॥

मन्दस्मिता स्कन्दमाता शुद्धचित्ता मुनिस्तुता ।

महाभगवती दक्षा दक्षाध्वरविनाशिनी ॥ १४॥

सर्वार्थदात्री सावित्री सदाशिवकुटुम्बिनी ।

नित्यसुन्दरसर्वाङ्गी सच्चिदानन्दलक्षणा ॥ १५॥

**फलश्रुतिः**

नाम्नामष्टोत्तरशतम्बायाः पुण्यकारणम् । सर्वसौभाग्यसिद्ध्यर्थं जपनीयं प्रयत्नतः ॥ १६॥

एतानि दिव्यनामानि श्रुत्वा ध्यात्वा निरन्तरम् । स्तुत्वा देवीञ्च सततं सर्वान्कामानवाप्नुयात् ॥ १७॥

॥ इति श्रीब्रह्मोत्तरखण्डे आगमप्रख्यातिशिवरहस्ये श्रीअन्नपूर्णाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

----------------------------

**स्वामी रुपेश्वरानंद जी द्वारा संशोधित**
**स्वामी रुपेश्वरानंद आश्रम (बलुआ , जिला - चंदौली ( उत्तर प्रदेश ))**
**Mobile No. : 7607 233 230**